After a great effort, he came up with a verse.

uttishhThottishhTha raajendra mukhaM prakshaalayasva TaH . prabhaate roditi kukku chavaituhi chavaituhi ..

Get up, get up, O King, wash your mouth. (here he uses taH to fill the meter). The cock cries in the morning, (and then, unable to find further matter, he writes all the fillets to fill the meter, not just once but twice! In sanskrit,there are certain fillet words to complete the meter. For Example, taH, cha, vai, tu, hi..)

People heard the verse, ridiculed him and remarked sarcastically,' You have all the qualities of good poet. You are the greatest poet of the all. We salute you as the foremost poet.'

कवेः अस्थिरबुद्धेः ।

अस्ति कश्चित् अस्थिरबुद्धिः नाम छात्रः । प्रारम्भशूरः सः सर्वदा किमपि किमपि नूतनं कार्यमारभते । परमेकस्यापि पारं न गच्छति नैकस्मिन् अपि विषये प्राप्नोति प्रावीण्यम् । तस्य नगरे भवति कवीनां सम्मेलनम् । अस्थिरबुद्धिः अपि सम्मेलनं गच्छति । तत्र कवयः मञ्चमारोहन्ति पठन्ति च स्वस्वकाव्यानि । कवेः एव मुखात् तस्य काव्यं शृण्वन्ति रसिकाः तेन चातीव मोदन्ते ते । प्राश्निकाः कवीनां काव्यानां गुणदोषपरीक्षणं कुर्वन्ति ज्ञापयन्ति चाधरोत्तरनिर्णयं तेषाम् । अनन्तरमध्यक्षः सम्मानयति सर्वश्रेष्ठं कविमर्पयति च कवये तस्मै बहुमूल्यमुपहारम् । तदनन्तरं द्वौ कवी समानगुणौ स्तः । तयोः कव्योः काव्यगुणान् भूरि प्रशंसन्ति प्राश्निकाः । ताभ्यां कविभ्यामध्यक्षः ददाति पारितोषिकाणि बहूनि । अन्येभ्यः कविभ्योऽपि यच्छति सः प्रशंसापत्राणि मूल्यवन्ति चोपायनानि । सर्वश्रेष्ठेन कविना, समानगुणाभ्यां कविभ्यां अन्यैः च कविभिः साकं परिचयप्राप्त्यर्थं स्पर्धन्ते सर्वे रसिकाः अभिनन्दन्ति च तान् सर्वान् कवीन् ।

अस्थिरबुद्धिः अवलोकयति सर्वमेतत् विचारयति च किमस्ति कवीनामेतेषां काव्ये ? केवलं शब्दाः एव । अहमपि रचयाम्येतादृशानि काव्यानि विन्दामि च कविः इति ख्यातिम् ।

महता प्रयासेन सः रचयति श्लोकमेकम् उत्तिष्ठोत्तिष्ठ राजेन्द्र मुखं प्रक्षालयस्व टः । प्रभाते रोदिति कुक्कु चवैतुहि चवैतुहि ॥

जनाः काव्यमेतत् शृण्वन्ति, हसन्ति, परिहासेन वदन्ति च अहो येषां गुणानां कवौ अपेक्षा वर्तते ते सर्वे त्वयि दृश्यन्ते । सर्वेषु कविषु श्रेष्ठः अतः एव महाकविः असि त्वम् । महाकविं त्वां प्रथमं वन्दामहे ।

॥ इति॥

Poet Asthirbuddhi ————————

Once upon a time, there lived a student called Asthirbuddhi (unsteady mind). He always had big plans and started them with a big fuss. But, neither did he finish any of his projects nor did he acquire any special skills in them. Once, his town hosted a gathering of poets. Asthirbuddhi (as a rule) also attended the gathering. There, all the poets took the stage and recited their poetry. The listeners were delighted to hear the poetry from the poets them- selves. The critics judged the poetry and graded the poets. Then the chief guest at the gathering honoured the best poet with a valuable prize. Then two of the poets ended up in a tie. Their poetry was greatly praised by the critics. The poets received many prizes from the guest. All the other poets also received certificates and valuable gifts. There was a competition in the fans to meet and congratulate the best poet, the tied poets and other poets as well.

On seeing this, our man Asthirbuddhi began to think, 'What is the poetry of these poets? It is only words. I will also compose poems and will acquire fame as a great poet.'